101. "योगवसिष्ठ" ग्रन्थः कस्य दार्शनिकसिद्धान्तस्य प्रतिपादनं करोति?
उ. अद्वैतवादस्य

102. 'योगवसिष्ठ' ग्रन्थस्य मूलसिद्धान्तं किम् अस्ति? ✓
उ. ज्ञानप्राप्तिः माध्यमेन मुक्तेः मार्ग प्रापणम्।

103. 'योगवसिष्ठे' आधि-व्याध्योः वर्णनं कस्य अध्यायस्य कस्मिन् सर्गे अस्ति?
उ. ३६ अध्यायस्य ८१ सर्गे। ✓

104. 'योगवसिष्ठ' ग्रन्थे सप्तभूमीनां वर्णनं कस्य अध्यायस्य कस्मिन् सर्गे अस्ति? ✓
उ. १८ अध्यायस्य ११८ सर्गे।

105. मोक्षस्य कति द्वारपालाः सन्ति? नामानि लिखतु। ✓
उ. चत्वारः। १. शमः २. विचारं ३. सन्तोषं ४. साधुसंगमम्।

106. शारीरिकदुःखान् योगवसिष्ठे किम् उक्तम्? ✓
उ. व्याधिः

107. योगवसिष्ठे मानसिकदुःखान् किम् उक्तम्? ✓
उ. आधि

108. महर्षि वसिष्ठानुसारम् आधि-व्याध्योः समूलनाशः केन भवति?
उ. ज्ञानेन। ✓

109. योगवसिष्ठानुसारं एकस्य तत्वस्य दृढभावनायै काः विधयः उक्तम्?
उ. ब्रह्मभावना, अभावभावना, केवलीभावना च। ✓

110. योगवसिष्ठानुसारं मनशान्त्यर्थं कति विधयः कथितं; ताश्च काः?
नामानि लिखतु। ✓
उ. दश विधयः। १. ज्ञानमुक्तिः २. संकल्पत्यागः ३. भोगेभ्यः विरक्तिः
४. वासनायाः त्यागः ५. अहंभावस्य नाशः ६. असंगस्य अभावः
७. कर्मभावत्यागः ८. सर्वत्यागः ९. समाधेः अभ्यासः १०. लयक्रिया।

Scanned with CamScanner

प्रसारणं न भवति तथैव प्राणानां गति यदा अवरुद्धा भवति तदा मनोऽपि शान्तः भवति। ~~(3/67/25-26)~~ (6/1/69/41)

प्राणस्पन्दनं स्थगनेन मनः शान्तं भवति एवञ्च मनसः शान्त भवेन संसारस्य लयं भवति (5/78/15-16)

113. योगवसिष्ठानुसारं प्राणनिरोधाय के के उपायाः सन्ति? स्पष्टयतु।

उ. योगवसिष्ठानुसारं निम्नोपायाः सन्ति यथा –

1. वैराग्यः, परमात्मनः ध्यानं, व्यसनक्षयः, निरोधस्य विशेषयुक्तिः परमार्थज्ञानञ्च। (5/12/85)

2. शास्त्राणां सज्जनानां च संगतिः, वैराग्याभ्यासः, सांसारिक वस्तुनिभ्यः मनसः प्रत्याहारम् (5/78/18)

3. इच्छित वस्तुनः ध्यानं, एक तत्वाभ्यासः (5/78/17)

4. दुःखादि अपानयनाय निरन्तरं प्राणायाम अभ्यासः, एकान्ते ध्यानम्। (5/78/20)

5. ॐकार नादेन सह शब्दतत्व भावना (5/78/21)

6. पूरकाभ्यासेन मेरुवत् दृढीकरणम् (5/78/23)

7. कुम्भकेन सहितं प्राण स्थगनम् (5/78/24)

8. तालुमूले स्थितां लघुजिह्वां जिह्वया यत्नपूर्वकं अभिभूय प्राणान् ऊर्ध्वरन्ध्रे नयनम् (5/78/25)

114. पञ्चकोशानां वर्णनं कस्मिन् उपनिषदि अस्ति? ✓

उ. तैत्तिरीयोपनिषदि।

115. पञ्चकोशानां नामानि कानि? ✓

उ. 1. अन्नमयकोशः 2. प्राणमयकोशः 3. मनोमयकोशः 4. विज्ञानमयकोशः 5. आनन्दमयकोशश्च।

Scanned with CamScanner

116. तैत्तिरीयोपनिषदस्य कस्मिन् अनुवाके पञ्चकोशानां वर्णनमस्ति?

उ. द्वितीय अनुवाके। ✓

117. तैत्तिरीयोपनिषद् कस्य वेदस्य कया शाखया सम्बन्धितोऽस्ति?

उ. कृष्णयजुर्वेदस्य तैत्तिरीय शाखया।

118. तैत्तिरीयोपनिषदि कति अध्यायाः सन्ति? क्रमशः नामानि लिखन्तु।

उ. त्रयः अध्यायाः। १. शिक्षावल्ली
2. ब्रह्मानन्दवल्ली
३. भृगुवल्ली।

119. तैत्तिरीय आरण्यकस्य दशप्रपाठकेषु कान्-कान् प्रपाठकान् तैत्तिरीयोपनिषद् वदामः?/ उच्यते?

उ. सप्तम, अष्टम, नवम-प्रपाठकान् तैत्तिरीयोपनिषद् उच्यते।

120. तैत्तिरीयोपनिषद्स्य क्रमशः शिक्षावल्ल्यां, ब्रह्मानन्दवल्ल्यां, भृगुवल्ल्यां च कति अनुवाकाः सन्ति?

उ. शिक्षावल्ल्यां → 12 अनुवाकाः
ब्रह्मानन्दवल्ल्यां → 9 अनुवाकाः
भृगुवल्ल्यां → 10 अनुवाकाः इति।

(1)

121. तैत्तिरीयोपनिषदस्य मुख्याः सूक्तयः काः सन्ति?

उ. अन्नं ब्रह्म वै, रसो वै सः, अन्नं न निन्द्यात्, सत्यं वद धर्मं चर। स्वाध्यायात् मा प्रमदः। मातृदेवो भव। पितृदेवो भव, आचार्य देवो भव इत्यादि।

122. प्राचीन भारतीयचिकित्सकस्य मतानुसारं शरीरस्य भेदाः सन्ति?

उ. त्रयः। (1.) स्थूलशरीरं (2.) सूक्ष्मशरीरं (3.) कारणशरीरम्।

(1) स्थूलशरीरं ⇒ शरीरमिदं पार्थिवशरीरं उच्यते। ~~अस्मिन् पञ्चमहाभूत~~ इदं शरीरं पञ्चमहाभूत प्रधानो भवति।

123. महर्षिपतञ्जलिना कथं शरीरत्रयं ~~कथं~~ पञ्चकोशे सम्मिलितं कृतम्? स्पष्टयतु

उ. महर्षिपतञ्जलिना शरीरत्रयाणां पञ्चकोशे विभाजनम् –

1) अन्नमयकोशः – पार्थिवशरीरं – Physical body
2) प्राणमयकोशः – प्राणशरीरं – Etheric body
3) मनोमयकोशः – मानसिकशरीरं – mental body
4) विज्ञानमयकोशः – मानसिकशरीरं – Intellectual body
5) आनन्दमयकोशः – स्वानन्द आत्मा – Causal body।

124. कः ~~अन्नमय~~ अन्नमयकोशः? स्पष्टयतु।

उ. कोशेऽस्मिन् ~~अ~~ पार्थिवशरीरम् आगच्छति। इदं शरीरं पाञ्चभौतिक-स्थूलशरीरस्य प्रथम भागोऽस्ति। यस्मिन् पञ्चकर्मेन्द्रियाणि अर्थात् मुखं, पाणि, पादः, उपस्थ तथा च गुदा। ~~पञ्चज्ञानेन्द्रियाणि~~ सप्तधातवः यथा – रस रक्त, मांस, मेद, अस्थि, मज्जा तथा च शुक्रः इति। पञ्चज्ञानेन्द्रियाणि – कर्ण, नेत्रं, त्वक्, जिह्वा नासिका च। सदैव पाचनसंस्थानं, अस्थिसंस्थानम् रुधिरसंस्थानं, मज्जा संस्थानं, श्वसनसंस्थानं, उत्सर्जनसंस्थानं च। एतत् सर्वम् अन्नमयकोशे आगच्छति।

125. अन्नमयकोशस्य स्वास्थ्यं कथं वर्धयितुं शक्नुमः?

128. तैत्तिरीयोपनिषदि आयुः कुम्भ उक्तम्? ✓
उ. प्राणम्।

129. कः बुद्धेः कोशः? ✓
उ. विज्ञानकोशः

130. कः प्राणमय कोशः? व्याख्यायतु। ✓
उ. अस्मिन् कोशे स्थूलप्राणः सूक्ष्मप्राणश्च आगच्छति। येन सम्पूर्ण-शरीरस्य कार्यम् उत व्यापारं चलति। यदा श्वासग्रहणं कुर्मः तदा पूरकम् श्वासस्थगनं कुम्भकः तथा च श्वासरेचनं रेचकः इति।

131. कः मनोमयकोशः? ✓
उ. अस्मिन् कोशे मनसः संकल्पविकल्पात्मकं विचारं, मनोव्यापारः इत्यादीनां समावेशो भवति।

132. कः विज्ञानमयकोशः? ✓
उ. यस्मिन् बुद्धितत्त्वं कार्यं करोति सः कोशः विज्ञानमयकोश नाम्ना ज्ञायते। सदसद्विवेकिनी बुद्धिः सत्कार्याय प्रेरयति।

133. कः आनन्दमय कोशः? ✓
उ. यत्र स्वानन्द आत्मनः निवासं भवति सः कोशः आनन्दमय कोशः इति। स्वानन्द आत्मनः स्वरूपम् आदि-अन्तरहितं च वर्तते। सुखसागरवत् तिष्ठति तथा च चित्तस्य साक्षी अस्ति। इयमेव मोक्षावस्था अस्ति एतदेव योगस्य उद्देश्यमस्ति।

134. कानि पञ्चकर्मेन्द्रियाणि? ✓
उ. मुखं, पाणि, पादम्, उपस्थः, जिह्वा च।

135. कानि पञ्चज्ञानेन्द्रियाणि? ✓
उ. कर्णं, नेत्रं, त्वक्, जिह्वा तथा च नासिका।

136. काः सप्तधातवः? ✓
उ. रसः, रक्तः, मांस, मेद, अस्थि, मज्जा शुक्रश्च।

137. साधकस्य दिनचर्या कथं भवेत्? ✓
उ. साधकेन ब्रह्ममुहूर्ते जागरणं कृत्वा धर्मार्थविषयकं चिन्तनं, ~~तथा च~~ शरीररोगाणां कारणविषयकं चिन्तनं तथा च वेदरहस्यस्य चिन्तनं कर्तव्यम्।
साधकेन प्रातः ब्रह्ममुहूर्ते जागरणम् ~~अक्ष~~ अवश्यमेव करणीयम्। चतुर्विंशतिः होरासु ब्रह्ममुहूर्तः सर्वश्रेष्ठः वर्तते। भाग्यादेव मानवजीवनम्

...नं। जीवनस्य प्रत्येकं क्षणं महत्वपूर्णमस्ति संत तुलसीदासेनापि उक्तम् -
"बड़े भाग मानुष तन पावा। सुरदुर्लभ सब ग्रंथहि गावा॥"

शारीरिकस्वास्थ्यं मनः, बुद्धि, आत्मा च इत्यादि दृष्ट्या ब्रह्ममुहूर्ते जागरणीयम् यतोहि ब्रह्ममुहूर्त समये प्रकृतिः मुक्तहस्तेन स्वास्थ्यं, प्रसन्नता, मेधा, बुद्धिं च प्रददाति। दिनचर्याय पालनीय बिन्दवः -

१ आत्मबोध साधना
२. भूमिमातरं नमस्कारः
३. ऊषापानम्
४. मलत्यागम्
५. दन्तधावनम्
६. अभ्यंगम्
७. क्षौरकर्म
८. व्यायामः
९. प्रातः भ्रमणम्
१०. वस्त्रधारणम्
११. सन्ध्योपासना योगाभ्यासश्च।
१२. स्वाध्यायम्
१३. भोजनम्
१४. शयनम्

138. 'उपनिषद्' पदस्य मूल धातुः, ~~...~~ प्रत्ययः अर्थश्च स्पष्टयत। ✓

उ. 'उप' 'नि' उपसर्गपूर्वकात् ~~...~~ "षद्लृ विशरणगत्यवसादनेषु" इति धातोः क्विप् प्रत्यये सति 'उपनिषद्' इति निष्पन्नः।

उप = समीपम्
नि = निष्ठापूर्वकम्
सद् = उपवेशनम्

अर्थात् तत्वज्ञानाय गुरुसमीपं गत्वा नम्रतापूर्वकम् ~~उपविश्य क्रिया~~ उपवेशनम्।

~~...~~
सद् धातोः त्रयः अर्थाः भवन्ति यत् -
१ विशरणं → नाशनम्
२. गति → ज्ञानम् (विषये ज्ञानम्)
३. अवसादनं → शिथिलम्

139. कति उपनिषदः सन्ति? ✓

उ. १०८ तः २०० पर्यन्तं मन्यते उपनिषद् संख्या। एतेषु एकादश (११) एव प्रमुखाः सन्ति। ते यथा - ईश, केन, कठ, प्रश्न, मुण्ड

| | |
|---|---|
| [illegible]-४० | गुणत्रयाणामनुसारेण ज्ञानं, कर्मः, कर्ता, बुद्धिः, धृतिः तथा च सुखम् इत्यादीनां पृथक्-पृथक् भेदाः। |
| ४१-४८ | फलेन सह वर्णधर्मस्य विषयः |
| ४९-५५ | ज्ञाननिष्ठायाः विषयः |
| ५६-६६ | भक्त्या सह कर्मयोगस्य विषयः |
| ६७-७८ | श्रीमद्भगवद्गीतायाः महात्म्यम् |

146. मानवानाम् उद्धारकरणाय त्रयराजमार्गाः "प्रस्थानत्रयः" केन नाम्ना अभिधीयते

उ. १. वैदिकप्रस्थानम् → उपनिषद्
२. दार्शनिकप्रस्थानम् → ब्रह्मसूत्रम्
३. स्मार्तप्रस्थानम् → भगवद्गीता

उपनिषद् मनुष्याणां विषयः वर्तते, 'ब्रह्मसूत्रम्' विदुषां विषयः अस्ति परन्तु भगवद्गीता सर्वेषां कृतेऽस्ति।

147. 'गीतारहस्यं' पुस्तकस्य लेखकः कः अस्ति?

उ. लोकमान्य तिलकः

148. सर्वतः लघुः दीर्घश्च उपनिषदः अस्ति?

उ. सर्वतः लघुः उपनिषद् → माण्डूक्योपनिषद्
सर्वतः दीर्घः उपनिषद् → बृहदारण्यकोपनिषद्।

149. 'अवस्थात्रयं' किम् अस्ति?

उ. 'जाग्रतस्वप्नसुषुप्तावस्था' एव अवस्थात्रयं नाम्ना ज्ञायते।

150. चेतनायाः कति अवस्थाः सन्ति?

उ. चतस्रः। १. जाग्रतावस्था २. स्वप्नावस्था
३. सुषुप्तावस्था ४. तुरीयावस्था च।

151. 'माण्डूक्योपनिषद्' केन वेदेन सम्बन्धितोऽस्ति?

उ. ~~अपर्वेदेन~~ अथर्ववेदेन।

152. अस्योपनिषदस्य नाम 'माण्डूक्योपनिषद्' कथं ~~क्षतम्~~ कृतम्?

उ. "माण्डूक्य ऋषिणा" अयमोपनिषदः लिखितम्; अतः माण्डूक्योपनिषद् नाम कृतम्।

153. माण्डूक्योपनिषदनुसारं जाग्रतावस्थायाः स्वरूपं स्पष्टयतु ?

उ. "जागरितस्थानो बहिष्प्रज्ञः सप्ताङ्गः एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः (आगमप्रकरणं -3)

भावार्थः → यदा त्वं जागरणं करोति, तदा विश्वे भवतः समानता भवति। तदा त्वं स्वेन्द्रियैः स्थूलपदार्थान् भोगयति। यदा त्वं सप्ताङ्गः एकोनविंशतिमुखानाँ उपयोगं करोति। तदा स्थूलशरीरं भवति। इदमेव वैश्वानरः आत्मनः प्रथमांशः वर्तते।

154. माण्डूक्योपनिषदनुसारं स्थूलपदार्थान् भोगाय कति अंङ्गाः उपयुज्यते?

उ. 'सप्ताङ्गः'। मस्तकः, नेत्रद्वयं, नासिका, मूत्रपिण्डः, द्वौ पादौ।

155. माण्डूक्योपनिषदनुसारं स्थूलपदार्थान् भोगाय कति द्वाराणां उपयोगम् करोति?

उ. एकोनविंशतिः(१९)। पञ्चकर्मेन्द्रियाणि, पञ्चज्ञानेन्द्रियाणि, पञ्चप्राणाः मनः, बुद्धि, चित्तम्, अहंकारश्च।

156. माण्डूक्योपनिषदनुसारं स्वप्नावस्थायाः स्वरूपं किम् अस्ति? स्पष्टयतु।

उ. "स्वप्नस्थानोऽन्तः प्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक्तैजसो द्वितीयः पादः" (आगमप्रकरणं -4)।

भावार्थः → यदा त्वं स्वप्नावस्थायां भवसि तदा सर्वाः क्रियाः मानसिकी एव भवति। जाग्रतावस्थावत् अस्याम् अवस्थायामपि सप्तावयवाः एकोनविंशतिः द्वाराणि भवन्ति परञ्च अस्याः अवस्थायाः अनुभवाः मानसिकाधारिता एव भवति। इयमेव अनुभवः ब्रह्मणः द्वितीयांशः वर्तते। अयमेव अंशः स्वप्नावस्था भवति। अस्मिन् समये आत्मा अन्तःकरणे तिष्ठति एवञ्च एकाकीरूपेण। एतदेव 'तैजस' नाम्ना ज्ञायते।

157. माण्डूक्योपनिषदनुसारं सुषुप्तावस्थायाः स्वरूपं किम्? स्पष्टयतु।

उ. "यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम्। सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक्चेतोमुखः प्राज्ञस्तृतीयः पादः (आगमप्रकरणम् -5)

भावार्थः → यदा त्वं प्रगाढनिद्रायां भवसि तदा तव मनसि कोऽपि इच्छा न भवति, कोऽपि स्वप्नो न भवति। इयमेव अवस्था 'सुषुप्तावस्था'

उच्यते) यदा त्वं सुषुप्तावस्थायां भवसि तदा त्वं केवलम् अद्वैतमेव पश्यसि। चैतन्यघनं विहाय न किमपि भवति। केवलं त्वम् आनन्दम् प्राप्नोति, चैतन्यं प्रति अग्रेसरति इति। इदं ब्रह्मणः तृतीयांशो वर्तते। इदमेव तृतीयांशः "प्राज्ञः" नाम्ना अभिधीयते।

158. गौडपादकारिकानुसारम् अवस्थात्रयस्य स्वरूपं स्पष्टयतु।

उ. अवस्थात्रय स्वरूपं निम्नोऽस्ति यत् -

" बहिष्प्रज्ञो विभुर्विश्वो ह्यन्तः प्रज्ञस्तु तैजसः।
घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृतः॥ (गौडपादकारिका 1)

1. जाग्रतावस्था → अस्याम् अवस्थायां संसारस्य ज्ञानं भवति। वयं विश्व नाम्ना जानीमः। इयमेव प्रथमावस्था।

2. स्वप्नावस्था → यदा वयं स्वप्ने भवामः तदा मनसः एव अनुभवो भवति तदा 'तेजस' इति वदामः। इयं द्वितीयावस्था।

3. सुषुप्तावस्था → यदा वयं अस्यामवस्थायां भवामः तदा किमपि ज्ञानं न भवति केवलं प्रगाढ निद्रायां भवामः। तदा 'प्राज्ञः' इति वदामः। इयमेव अस्माकं तृतीयावस्था भवति परन्तु त्रिषु अवस्थासु त्रिषु आत्मनः स्वरूपम् एकं एव भवति।

159. सांख्यदर्शनानुसारं मनुष्याणां परमं लक्ष्यं किम् अस्ति? ✓

उ. आधिभौतिकं, आधिदैविकं तथा च आध्यात्मिकं इति दुःखत्रयाणां दुःखत्रयेभ्यः एकान्तिकात्यान्तिक निवृत्तिः' परमं लक्ष्यं वर्तते।

160. सांख्यदर्शनं किदृश दर्शनमस्ति? (आस्तिकं उत नास्तिकम्) ✓

उ. आस्तिकदर्शनम्।

161. " सांख्य" पदेऽस्मिन् मूलधातुः किम् अस्ति? ✓

उ. '-चक्षिङ्'

166. पौराणिकमतानुसार कपिलमुनिः कस्य अवतारः ~~आसी~~ आसीत् ?

उ. अग्नेः ।

167. श्रीमद्भगवतमहापुराणानुसारेण कपिलमुनिः ~~कुस्य~~ कस्य अवतारः आसीत् ?

उ. विष्णोः ।

168. 'सांख्यकारिका' ग्रन्थस्य अपरं नाम किमस्ति ? ✓

उ. 'सांख्यसप्ततिः'

169. परिणामवादः सत्कार्यवादस्य कस्य सिद्धान्तौ स्तः ? ✓

उ. 'सांख्याचार्यः कपिलमुनेः ।'

170. सांख्यकारिकायां कति कारिकाः सन्ति ?

उ. 'सप्ततिः'

171. सांख्यदर्शनानुसारं तत्वानां संख्या कति ? ✓

उ. पञ्चविंशतिः (२५)

172. सांख्यदर्शने अव्यक्तः किम् ? ✓

उ. प्रकृतिः

173. सांख्यकारिकायाः प्रथमाकारिकायां कति दुःखानि वर्णितानि ? ✓

उ. त्रीणि ।

174. सांख्यदर्शने पुरुषः अस्ति ? ✓

उ. न प्रकृतिर्न विकृतिः पुरुषः

175. कैवल्यप्राप्तिःपर्यन्तो तटस्थ भावेन कः पश्यति ? ✓

उ. पुरुषः

176. मनुष्यः कस्य संयोगेन दुःखी उदासीनं च भवति ? ✓

उ. प्रकृत्यासंयोगेन

Scanned with CamScanner

7. सांख्यमतानुसारं संसारे बन्धमोक्षयोः कारणं किम् ? ✓
उ. प्रकृतिः

178. योगदर्शने कति तत्वानि सन्ति ? ✓
उ. षड्विंशतिः (26)

179. सांख्यदर्शनस्य वर्णनं कस्मिन् उपनिषदि प्राप्यते ?
उ. श्वेताश्वतरोपनिषदि ।

180. त्रिगुणात्मिका का अस्ति ? नाम वर्णश्च लिखत । ✓
उ. त्रिगुणात्मिका प्रकृतिः अस्ति । गुणत्रयमस्ति यत्
1. सत्वः - श्वेतवर्णः (सफेद) 2. रजः - रक्तवर्णः (लाल)
3. तमः - कृष्णवर्णः (काला) ।

181. सांख्यदर्शने वर्णितानि पञ्चविंशतिः तत्वानि स्पष्टयत । ✓
उ. प्रकृतिः, बुद्धि (महत्), अहंकारः, मनः, पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, पञ्चतन्मात्राणि, पञ्चमहाभूतानि पुरुषश्च ।

182. पञ्चतन्मात्राणि कानि ? ✓
उ. शब्दः, स्पर्शं, रूपं, रसं गन्धश्च ।

183. कति चित्तभूमयः सन्ति ? ✓
उ. पञ्च । क्षिप्त, मूढ, विक्षिप्त एकाग्र निरुद्धश्च ।

184. कति चित्तवृत्तयः सन्ति ? ✓
उ. पञ्च । प्रमाणं, विपर्ययः, विकल्प, निद्रा स्मृति च ।

185. के पञ्चक्लेशाः ? ✓
उ. अविद्या, अस्मिता, रागः, द्वेषः अभिनिवेशश्च ।

186. किं नाम मोक्षः ? ✓
उ. दुःखं दुःखकारणेभ्यश्च मुक्तिः एव मोक्षः इति ।

187. कैवल्यं कः प्राप्नोति ? ✓
उ. पुरुषः

8. पुरुषस्य लक्षणं किम्? ✓
उ. विवेक भावः

189. किं नाम प्रकृतिः? ✓
उ. त्रिगुणात्मिका प्रकृतिः।

190. पञ्चमहाभूताः केभ्यः जायन्ते? ✓
उ. पञ्चतन्मात्रेभ्यः

191. ~~क्लिष्ट~~ किं नाम क्लिष्टवृत्तिः? ✓
उ. अविद्या कारणात् ~~जायमान~~ दुःखदायी वृत्तिः क्लिष्टवृत्तिः इति।

192. चित्तं कदा सक्रियो भवति? ✓
उ. पुरुषप्रभाव कारणात्।

193. योगदर्शने षड्विंशतितमः तत्वस्य नाम किम्? ✓
उ. ईश्वरः

194. समाधि समये कः बाधां उत्पादयति? ✓
उ. क्लेशः

195. "श्रूयते ज्ञानान्मुक्तिः" कस्मात् ग्रन्थात् उद्धृतोऽस्ति?
उ. सांख्यदर्शनात्

196. सर्वप्रथमं केनोक्तं यत् गीतायाः प्रतिपाद्य विषयः ज्ञानं भक्तिश्च नास्ति अपितु कर्मः अस्ति?
उ. ~~आदि शङ्कराचार्येण~~। लोकमान्य तिलकेन।

197. सर्वप्रथमं केनोक्तं यत् गीतायाः प्रतिपाद्यो विषयः कर्मः भक्तिश्च नास्ति अपितु ज्ञानमस्ति?
उ. आदि शङ्कराचार्येण।

198. हठयोगप्रदीपिकायां कति आसनानि श्रेष्ठानि उक्तानि? ✓
उ. चत्वारि। पद्मासनं, सिंहासनं, सिद्धासनं भद्रासनं च।

199. "विश्वे वायुः प्राणरूपेण स्थितोऽस्ति" इति कस्मिन् उपनिषदि उक्तमस्ति?
उ. मुण्डकोपनिषदि।

200. कं जगतः आत्मा ~~मस्च~~ मनश्च उक्तम्? क्रमशः लिखतु। ✓
उ. सूर्यं जगतः आत्मा, चन्द्रमसं जगतः मनः उक्तम्।

Scanned with CamScanner